दिनाङ्क :- 17.02.2026

प्रात: - 06:55

## प्रधानमन्त्री - फ्रेंच राषट्रपति

प्रधानमन्त्री नरेन्द्रमोदी अद्य मुम्बै-नगरे फ़्रान्स्-देशस्य राष्ट्रपतिना इम्मानुयेल् म्याक्रोन् इत्यनेन सह मिल्यात् । मेलनावधौ , द्वौ नेतारौ भारत-फ़्रान्स्-सामरिकसहभागित्वस्य प्रगतिं वीक्ष्य क्षेत्रीय-वैश्विक-महत्त्वस्य विषयेषु विचार-विनिमयं करिष्यतः । एषा यात्रा राष्ट्रपतिः म्याक्रोन् वर्यस्य भारतं प्रति चतुर्थयात्रा, मुम्बै-नगरस्य च प्रथमयात्रा भविष्यति। सायङ्काले द्वौ नेतौ भारत-फ़्रान्स् नवान्वेषणवर्षम् 2026 उद्घाटयिष्यतः सममेव उभयदेशयोः व्यापारनेतृणां, शोधकर्तृणां, अन्ये च नवान्वेषकानां समागमं सम्बोधयिष्यतः।

## राष्ट्रपतिः द्रौपदी मुर्मु

राष्ट्रपतिः द्रौपदी मुर्मु अवोचत् यत्, सन्तालीभाषायाः ओल्-चिकी-लिप्याः संरक्षणार्थं प्रचारार्थं च प्रयत्नः करणीयः इति। नवदिल्लयाम् ओल्-चिकी-लिप्याः शतवार्षिक-समारोहं सम्बोधयन्ती राष्ट्रपतिः मुर्मुः अवदत् यत्, ओल्-चिकी सन्ताली-समुदायस्य प्रबलः परिचयः अस्ति इति। राष्ट्रपतिः अवदत् यत्, ओल्-चिकी-लिपिः न केवलं देशे अपितु विश्वव्यापीरूपेण अपि विस्तृता अस्ति।

## भारत-ए. आई. इम्पैक्ट-समिट्

भारत-ए.आई.इम्पैक्ट-शिखरसम्मेलनम् नवदिल्ल्याम् आरभत। पञ्चदिवसीयं एतत् शिखरसम्मेलनं ग्लोबल-साऊथ् इत्यत्र आयोजितं प्रथमं वैश्विक-ए. आई.

शिखरसम्मेलनं वर्तते । एतत् शिखर-सम्मेलनं वैश्विक-ए.आई. कार्यसूचीं निर्माय प्रमुख-मञ्चरूपेण भारतस्य भूमिकां सुदृढं करिष्यति । शिखरसम्मेलने शतं देशाः आमन्त्रिताः, द्विलक्षतः अधिकाः जनाः च अन्तर्जालमाध्यमेन पञ्जीकरणं कृतवन्तः। विंशतिदेशानाम् विश्वनेतारः अस्मिन् कार्यक्रमे भागं गृह्णन्ति। विदेशमन्त्रालयः अवदत् यत् बोलिविया, क्रोएशिया, एस्टोनिया, फिन्लैण्ड्, ग्रीस्, गयाना, कजाख्स्तान्, लिच्टेन्स्टैन्, सर्बिया, स्लोवाकिया चेत्यादीनां देशानां नेतारः अपि अस्मिन् सम्मेलने भागं गृह्णन्ति।

प्रधानमन्त्री-ए.आई

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् देशवासिनां कृते एषः अतीव गौरवास्पदः विषयः अस्ति यत् इण्डिया ए. आई. इम्पैक्ट्-समिट् इत्यस्य कृते समग्र-जगतः जनाः भारतं प्रति आगच्छन्ति । सामाजिक-सञ्जाल-माध्यमेन, श्रीमोदीवर्यः शिखरसम्मेलनाय विश्वनेतृभ्यः, उद्योगनेतृभ्यः, नवान्वेषकेभ्यः, नीतिनिर्मातृभ्यः, शोधकर्तृभ्यः, तन्त्रज्ञानप्रेमिभ्यः च स्वागतपूर्वकं वर्धापनं प्रायच्छत् । अयं देशः विज्ञान-तन्त्रज्ञान-क्षेत्रे द्रुतगत्या प्रगतिं कुर्वन् अस्ति इति प्रमाणम् अस्ति, वैश्विकविकासाय महत्त्वपूर्णं योगदानं अनेन प्रदत्तम् इत्यपि श्रीमोदी प्रत्यपादयत् । प्रधानमन्त्री उक्तवान् यत् अयं अवसरः देशस्य युवकानां क्षमताम् अपि दर्शयति । सः इत्यपि अधोरेखितवान् यत् सम्मेलनस्य विषयः सर्वजन-हिताय सर्वजन-सुखाय अथवा सर्वेभ्यः कल्याणाय, सर्वेभ्यः सुखाय इति अस्ति, यः मानवकेन्द्रितप्रगतिं साधयितुं कृत्रिमबुद्धिं उपयोक्तुं देशस्य सहभागितां प्रतिबद्धतां च प्रतिबिम्बयति।

अमितशाहः मन्थन-सभायाः

केन्द्रीय गृहमन्त्री अमितशाहः अद्य गान्धीनगरे राज्यानां केन्द्रशासितप्रदेशानां च सहकार-मन्त्रिणां उच्च-स्तरीय-मन्थन-सभायाः आध्यक्षं विधास्यति। सहकार-मन्त्रालयः अवदत् यत् अयं मञ्चः मन्त्रालयस्य प्रमुख-उपक्रमाणां विस्तृत-समीक्षां कर्तुं, प्रगत्याः मूल्याङ्कनं कर्तुं, राज्यानां उत्तम-अभ्यासानां अनुभवानां च आदानप्रदानम् अपि च भविष्यस्य कृते समन्वित-मार्गचित्रस्य निर्माणं च समर्थयति।